स्वरी। अ क, दिम्ययति दिम्ययते। सङ्घातो राशीकरणम्। एष: केश्चिन्न मन्यते। इति दुर्गादास:॥

दिलीप:, पुं, सूर्य्यवंशीयराजविशेष:। सूर्य्यवंशे दिलीपनामानौ द्वौ नृपौ जातौ एक: अंशुमत: पुत्र: भगीरथपिता अपर: दशरथप्रपिता-महश्च। इति रामायणम्॥ (यथा च हरि-वंशे। १५। १२-१४,२३-२५।
"सुत: पञ्चजनस्यासीदंशुमान्नाम वीर्य्यवान्।
दिलीपस्तनयस्तस्य खट्टाङ्ग इति विश्रुत:॥
येन स्वर्गादिहागत्य मुहूर्त्तं प्राप्य जीवितम्।
त्रयोऽनुसन्धिता लोका बुद्ध्या सत्येन चानघ!॥
दिलीपस्य तु दायादो महाराजो भगीरथ:।
य: स गङ्गां सरिच्छ्रेष्ठामवातारयत प्रभु:॥"
"अनमित्रस्य धर्म्मात्मा विद्वान् दुलिदुहोऽभवत्।
दिलीपस्तनयस्तस्य रामस्य प्रपितामह:॥
दीर्घबाहुर्दिलीपस्य रघुर्नाम्नाभवत् सुत:।
अयोध्यायां महाराजो रघुश्चासीत् महाबल:॥
अजस्तु रघुतो जज्ञे अजाद्दशरथोऽभवत्।
रामो दशरथात् जज्ञे धर्म्मात्मा सुमहायशा:॥")

दिलीपराट्, [ज्] पुं, (दिलीप एव राट् राजा।) दिलीपराज:। इति त्रिकाण्डशेष:॥

दिलीरं, क्ली, शिलीन्ध्रकम्। इति हारावली।२५॥

दिव, इ प्रीतौ। इति कविकल्पद्रुम:॥ (भ्वा-पर-सकं-सेट्।) इ, दिन्वति। प्रीतिरिह प्रीती-करणम्। दिन्वति लोक: पितरम्। इति दुर्गा-दास:॥

दिव, क अर्द्दे। इति कविकल्पद्रुम:॥ (चुरां-पर-सकं-सेट्।) क, देवयति। अर्द्द इह पीड़न-मिति मैत्रेय:। यातनं गमनं वेति रमानाथ:। इति दुर्गादास:॥

दिव, क ङ परिकूजने। इति कविकल्पद्रुम:॥ (चुरां-आत्मं-अकं-सेट्।) क ङ, परिदेवयते कश्चित्तस्य रात्रे न दु:खित:। इति हलायुध:। इति दुर्गादास:॥

दिव, य उ जिगीषेच्छयो:। पणौ। द्युतौ। क्रीड़ा-याम्। गतौ। इति कविकल्पद्रुम:॥ (दिवा-पर-अकं-सकं-च सेट्। उदित्वात् क्त्वावेट्।) य, दीव्यति। उ, देवित्वा द्यूत्वा। दीव्यमानं शितान् बाणान्। इति भट्टौ ताच्छील्ये शतु:-शान:। पणिर्व्यवहार: स्तुतिश्च। व्यवहारस्तु क्रयविक्रयरूप:। द्युतावेवाकर्म्मक:। क्रीड़ा-यान्तु दीव्यते: करणस्य नित्यं कर्म्मत्वम्। तच्च तृतीयाविभक्तिरेव विभाव्यते। इति साम्प्र-दायिकम्। तेन अक्षा दीव्यन्ते छात्रेण इति कर्म्मणि प्रत्यय: स्यात्। अक्षैर्दीव्यते छात्रे-णेति भावे प्रत्ययो न स्यात् अक्षैर्देवयति छात्रेण गुरुरित्यत्राप्यण्यन्तस्य कर्त्तु: कर्म्मत्वं न स्यात्। तेनाद्यू बयदामं स्पृशेन्न स्पृशोपना। इति भट्टौ तु तैनैतिकरणं दृष्टामिरेव न तु दीव्यते:। तेनाकर्म्मकत्वात् राममित्यण्यन्तकर्त्तु: कर्म्मत्वम्। इति दुर्गादास:॥

दिवं, क्ली, (दीव्यन्त्यस्मिन्निति। दिवु क्रीड़ायाम्+घञर्थे अधिकरणे क:।) स्वर्ग:। (यथा, देवी-भागवते। ५। ३। १०।
"गच्छ वीर! महाबाहो दूतत्वं कुरु मेऽनघ!॥
ब्रूहि शक्रं दिवं गत्वा नि:शङ्क: सुरसन्निधौ॥")
आकाशम्। इति मेदिनी। वे, ११॥ वनम्। दिवा। इति हेमचन्द्र:।२।५२॥

दिवस:, पुं, क्ली, (दीव्यन्त्यत्रेति। दिव+"दिव: कित्।" उणां।३।१२१। इति असच् स च कित्।) दिनम्। इत्यमर:।१।४।२॥ (यथा, आर्य्यासप्तशत्याम्। २७८।
"श्लाघयता दिवसानि त्वदीयविरहेण तीव्रतापेन। ग्रीष्मेणेव नलिन्या जीवनमल्पीकृतं तस्या:॥")

दिवसकर:, पुं, (करोतीति। कृ+अच्। दिव-सस्य कर:।) सूर्य्य:। इति हेमचन्द्र:।२।११॥ (यथा, आर्य्यासप्तशत्याम्। ६३६।
"सुन्दर सखी दिवसकरबिम्बे तुहिनांशुरेखेव॥")

दिवसमुखं, क्ली, (दिवसस्य मुखम्।) प्रभातम्। इति हलायुध:॥

दिवस्पति:, पुं, (दिव: पति:। अलुक्समास:।) इन्द्र:। इत्यमर:।१।१।४५॥ (यथा, महाभारते।५।१२।६।
"इन्द्राणीमानयिष्यामो यद्येच्छसि दिवस्पते!॥")

दिवस्पृथिव्यौ, स्त्री, (द्यौश्च पृथिवी च। "दिवसश्च पृथिव्याम्।"६।३।३०। इति दिवो दिवसादेश:।) रोदसी। स्वर्गभूम्यौ। इति हेमचन्द्र:।४।४॥ द्विवचनान्तोऽयम्। (यथा, ऋग्वेदे।२।२।३।
"तं देवा बुध्ने रजस: सुदंस संदिवस्पृथिव्यो-ररतिं न्येरिरे॥")

दिवा, व्य, दिनम्। इत्यमर:।३।४।६॥ (यथा, महाभारते।२।११।३४।
"क्षणा लवा मुहूर्त्ताश्च दिवा रात्रिस्तथैव च॥")

दिवा, [न्] पुं, (दीव्यत्यस्मिन्निति। दिव+"कनिन् युवृषीति।" उणां।१।१५६। इति सूत्रे "बहुलवचनात् केवलादपि कनिन्।" इति उज्ज्वलदत्तोक्त्या कनिन्।) दिनम्। इत्युणादि-कोष:॥

दिवाकर:, पुं, (दिवा दिनं करोतीति। कृ+"दिवाविभेति।" ३।२।२१। इति ट:।) सूर्य्य:। (यथा, देवीभागवते।२।६।१८।
"उदितश्च तदा भानुस्तया दृष्टो दिवाकर:॥")
अर्कवृक्ष:। इत्यमर:॥ काक:। पुष्पविशेष:। इति शब्दचन्द्रिका॥

दिवाकीर्त्ति:, पुं, (दिवा दिवसे एव कीर्त्तिर्यस्य। रात्रौ चौरकर्म्मनिषेधात्।) नापित:। चण्डाल:। ("रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च। दिवा चरेयु: कार्य्यार्थं चिह्निता राजशासनै:॥" १०।५४। इति मनुवचनात् अस्य दिवाचर-त्वात् तथात्वम्॥ यथा, मनु:।५।८५।
"दिवाकीर्त्तिमुदक्याञ्च पतितं सूतिकां तथा। शवन्तत्स्पृष्टिनञ्चैव स्पृष्ट्वा स्नानेन शुध्यति॥"
तथाच काशीखण्डे।७६।८७।
"दौवारिको वा दिवाकीर्त्ति: पण्डितो वाप्य-पण्डित:।
तुल्यो मे मोक्षदीक्षायां संप्राप्य मणिकर्णि-काम्॥")
उलूक:। इति हेमचन्द्र:।३।५६७॥

दिवाटन:, पुं, (दिवा अटतीति। अट गतौ+ल्यु:।) काक:। इति शब्दार्थकल्पतरु:॥ (चाण्डाल:। "दिवाचरेयु: कार्य्यार्थं चिह्निता राजशासनै:।"१०।५४। इति मनुशासनात्॥)

दिवातन:, त्रि, (दिवा भव:। दिवा+"सायं-चिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च।"४।३।२३। इति ट्यु: तुट् च।) दिनभव:। यथा, भट्टि:।५।६५।
"सायन्तनीं तिथिप्रण्य: पङ्कजानां दिवातनीम्। कान्तिं कान्त्या सदातन्या ह्रेपयन्ती शुचि-स्मिता॥"

दिवान्ध:, पुं, (दिवा दिवसे अन्ध:।) पेचक:। इति त्रिकाण्डशेष:॥ (यथा, पञ्चतन्त्रे।३।७५।
"यत् मयूरहंसकोकिलचक्रवाकशुककारण्डव-हारीतकसारसादिषु पक्षिप्रधानेषु विद्यमानेषु तस्य दिवान्धस्य करालवक्त्रस्याभिषेक: क्रियते नैतत् मम मतम्॥") दिवान्धे, त्रि। यथा,—
"दिवान्धा: प्राणिन: केचिद्रात्रावन्धास्तथापरे। केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टय:॥"
इति चण्डी॥

दिवान्धा, स्त्री, (दिवा दिवसे अन्धा।) वल्गुली पक्षी। इति राजनिर्घण्ट:॥

दिवान्धकी, स्त्री, (दिवा अन्धकी दर्शनक्रिया-वर्जिता।) छुछुन्दरी। इति पुराणम्॥

दिवाभीत:, पुं, (दिवा दिवसे भीत:।) उलूक:। कुमुदाकर:। चौर:। इति मेदिनी। ते, १६७॥ (दिवसभीते, त्रि। यथा, कुमारे।१।१२।
"दिवाकराद्रक्षति यो गुहासु
लीनं दिवाभीतमिवान्धकारम्॥")

दिवाभीति:, स्त्री, (दिवा दिवसे भीतिर्भयं यस्य।) पेचक:। इति शब्दरत्नावली॥

दिवामणि:, पुं, (दिवा दिनस्य मणिरिव।) सूर्य्य:। इति शब्दरत्नावली॥

दिवामध्यं, क्ली, (दिवा दिवसस्य मध्यम्।) मध्याह्न:। इति हेमचन्द्र:।२।५३॥

दिवास्वापा, स्त्री, (दिवा दिवसे स्वापो निद्रा यस्या:।) वल्गुला पक्षी। इति राज-निर्घण्ट:॥

दिवि:, पुं, (दीव्यतीति। दिवु क्रीड़ायाम्+"इगुपधात् कित्।" उणां ४।११९। इति इन् स च कित्।) चाषपक्षी। इति शब्दमाला॥

दिविज:, त्रि, (दिवि स्वर्गे जायते इति। दिवि+जन+ड:। "प्रावृट्शरत्कालदिवां जे।" ६।३।१५। इति सप्तम्या अलुक्।) स्वर्गीय:। इति संक्षिप्तसार:॥

दिविषत्, [द्] पुं, (दिवि सीदतीति। सद्+क्विप्। सप्तम्या अलुक्। षत्वञ्च।) देव:।